अर्द्धनारीनरवपुः पुरुषोऽतिशरीरवान् ।
विभजात्मानमित्युक्त्वा स तदान्तर्दधे ततः ॥१०॥

स चोक्तो वै पृथक् स्त्रीत्वं पुरुषत्वं तथाकरोत् ।
बिभेद पुरुषत्वञ्च दशधा चैकधा तु सः ॥११॥

सौम्यासौम्यैस्तथा शान्तैः पुंस्त्वं स्त्रीत्वञ्च स प्रभुः ।
बिभेद बहुधा देवः पुरुषैरसितैः सितैः ॥१२॥

ततो ब्रह्मात्मसम्भूतं पूर्वं स्वायम्भुवं प्रभुः ।
आत्मनः सदृशं कृत्वा प्रजापालो मनुं द्विज ॥१३॥

किन्तु इन नव मानस-पुत्रों और रुद्र की सृष्टि के भी पहले स्वयंभू प्रजापति ने उनके पूर्वज सङ्कल्प और धर्म की सृष्टि की थी। सनन्दन प्रभृति, जिनकी सृष्टि उन्होंने पहले की थी, ऐसे निकले जो कि लौकिक सुखभोग में अनासक्त, लौकिक सुखभोग के प्रति निरपेक्ष तथा समाहितचित्त थे और सब के सब स्वाभाविक ज्ञान से सम्पन्न, वीत-राग तथा ईर्ष्याद्वेष के भावों से अछूते थे ॥ ७-८ ॥

जब ब्रह्मा ने इन मानसपुत्रों की लोक-सृष्टि के चक्र को आगे चलाने में निरपेक्ष देखा, तब उन्हें बहुत अधिक क्रोध हुआ, जिससे एक सूर्य सदृश तेजोमय, विशालकाय, अर्द्धनारीश्वर रूप प्रादुर्भूत हुआ। ब्रह्मा उससे यह कह कर कि वह अपने स्त्रीपुंमय शरीर का विभाजन कर दे, अन्तर्हित हो गए। ब्रह्मा के कहने के अनुसार उसने अपने आपको स्त्रीभाग तथा पुरुषभाग में विभक्त कर दिया और पुरुषभाग के इग्यारह भाग कर दिए ॥ ९-११ ॥

ब्रह्मा प्रजापति ने स्त्री और पुरुष—दोनों के स्वभाव सौम्य और असौम्य रूप से दो प्रकार के बना दिये तथा पुरुषों के गौरवर्ण और कृष्णवर्ण आदि भेदों से अनेक भेद कर दिए ॥ १२ ॥

जगदीश्वर, प्रजापति ब्रह्मा ने अपने ऊपर अपनी प्रजा के पालन का भार उठाया और अपने आत्मसंभूत स्वायंभुव मनु नामक पुत्र को, सर्वप्रथम, अपने सदृश बनाया।

शतरूपाञ्च तां नारीं तपोनिर्धूतकल्मषाम् ।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे विभुः ॥१४॥
तस्माच्च पुरुषात् पुत्रौ शतरूपा व्यजायत ।
प्रियव्रतोत्तानपादौ प्रख्यातावात्मकर्मभिः ॥१५॥
कन्ये द्वे च तथा ऋद्धिं प्रसूतिश्च ततः पिता ।
ददौ प्रसूतिं दक्षाय तथा ऋद्धिं रुचेः पुरा ॥१६॥
प्रजापतिः स जग्राह तयोर्यज्ञः सदक्षिणः ।
पुत्रो जज्ञे महाभाग ! दम्पतीमिथुनं ततः ॥१७॥
यज्ञस्य दक्षिणायान्तु पुत्रा द्वादश जज्ञिरे ।
यामा इति समाख्याता देवाः स्वायम्भुवोऽन्तरे ॥१८॥
तस्य पुत्रास्तु यज्ञस्य दक्षिणायां सभास्वराः ।
प्रसूत्याञ्च तथा दक्षश्चतस्रो विंशतिस्तथा ॥१९॥

साथ ही साथ शतरूपा नाम की नारी की भी सृष्टि की, जो कि तपश्चरण से निष्कलुष थी। स्वायंभुव मनु ने उस शतरूपा को ही अपनी धर्मपत्नी के रूप में ग्रहण किया ॥ १३-१४ ॥

स्वायंभुव मनु से शतरूपा ने दो पुत्रों को जन्म दिया, जिनके नाम प्रियव्रत और उत्तानपाद थे और जो अपने-अपने कर्मों के कारण लोक में बहुत प्रसिद्ध हुए ॥ १५ ॥

स्वायंभुव मनु और शतरूपा की ऋद्धि और प्रसूति नाम की दो कन्याएँ भी हुईं। स्वायंभुव मनु ने, जो कि उनके पिता थे, पहले ही प्रसूति नाम की कन्या को दक्ष के लिए तथा ऋद्धि नाम की कन्या को रुचि के लिए दे दिया ॥ १६ ॥

प्रजापति रुचि ने ऋद्धि को पत्नी रूप में स्वीकार किया और इन दोनों से यज्ञ नाम का पुत्र तथा दक्षिणा नाम की पुत्री का जन्म हुआ। इसके बाद यज्ञ और दक्षिणा दम्पति-मिथुन (पति-पत्नी-युगल) के रूप में रहने लगे ॥ १७ ॥

दक्षिणा से यज्ञ ने बारह पुत्र उत्पन्न किये, जिन्हें स्वायंभुव मन्वन्तर के याम नामक द्वादश देव कहा जाता है ॥ १८ ॥

दक्षिणा से यज्ञ के जो पुत्र जन्म लिए थे वे बड़े तेजस्वी थे। प्रसूति नाम से भी दक्ष की सन्तति हुई जो संख्या में चौबीस थी ॥ १९ ॥

ससर्ज्ज कन्यास्तासाञ्च सम्यङ्नामानि मे शृणु ।
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ।।२०।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी ।
पत्न्यर्थे प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः ।।२१।
ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः ।
ख्यातिः सत्यथ सम्भूतिः स्मृतिः प्रीतिस्तथा क्षमा ।।२२।
सन्ततिश्चानसूया च ऊर्ज्जा स्वाहा स्वधा तथा ।
भृगुर्भवो मरीचिश्च तथा चैवाङ्गिरा मुनिः ।।२३।
पुलस्त्यः पुलहश्चैव क्रतुश्च ऋषयस्तथा ।
वसिष्ठोऽत्रिस्तथा वह्निः पितरश्च यथाक्रमम् ।।२४।
ख्यात्याद्या जगृहुः कन्या मुनयो मुनिसत्तमाः ।
श्रद्धा कामं श्रीश्च दर्पं नियमं धृतिरात्मजम् ।।२५।
सन्तोषञ्च तथा तुष्टिर्लोभं पुष्टिरजायत ।
मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च ।।२६।
बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम् ।
व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत ।।२७।

दक्ष की यह सन्तति चौबीस कन्याएँ थीं, जिनके नाम सुनो जिन्हें मैं तुम्हें बता रहा हूँ। इन चौबीस कन्याओं के नाम ये थे—१) श्रद्धा, २) लक्ष्मी, ३) धृति, ४) तुष्टि, ५) पुष्टि, ६) मेधा, ७) क्रिया, ८) बुद्धि, ९) लज्जा, १०) वपु, ११) शान्ति, १२) सिद्धि तथा १३) कीर्ति। धर्म ने दक्ष प्रजापति की इन सभी कन्याओं से विवाह कर अपनी धर्मपत्नी बना लिया ॥ २०-२१ ॥

इन कन्याओं के बाद इनसे छोटी इग्यारह सुन्दर कन्याएँ बच गयीं थीं, जिनमें १ली) ख्याति, २री) सती, ३री) संभूति, ४थी) स्मृति, ५वीं) प्रीति, ६ठीं) क्षमा, ७वीं) सन्तति, ८वीं) अनसूया, ९वीं) ऊर्जा, १०वीं) स्वाहा तथा ११वीं) स्वधा नाम की थीं। इन ख्याति आदि इग्यारह कन्याओं से क्रमशः १) मुनि भृगु, २) मुनि भव, ३) मुनि मरीचि, ४) अङ्गिरा मुनि, ५) ऋषि पुलस्त्य, ६) ऋषि पुलह, ७) ऋषि क्रतु ८) महर्षि वसिष्ठ, ९) महर्षि अत्रि, १०) महर्षि वह्नि तथा ११) पितरों ने विवाह कर लिया। इन चौबीस कन्याओं में से श्रद्धा ने काम को, श्री ने दर्प को तथा धृति ने नियम को पुत्ररूप में उत्पन्न किया ॥ २२-२५ ॥

इसी प्रकार, तुष्टि ने सन्तोष तथा पुष्टि ने लोभ को पुत्ररूप में जन्म दिया। मेधा से श्रुत, क्रिया से दण्ड, नय और विनय, बुद्धि से बोध, लज्जा से विनय, वपुष् से

सुखं सिद्धिर्यशः कीर्तिरित्येते धर्मयोनयः ।
कामादतिमुदं हर्षं धर्मपौत्रमसूयत ॥२८॥
हिंसा भार्य्या त्वधर्मस्य तस्यां जज्ञे तथानृतम् ।
कन्या च निर्ऋतिस्तस्यां सुतौ द्वौ नरकं भयम् ॥२९॥
माया च वेदना चैव मिथुनं द्वयमेतयोः ।
तयोर्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ॥३०॥
वेदनात्मसुतश्चापि दुःखं जज्ञेऽथ रौरवात् ।
मृत्योर्व्याधि-जरा-शोक-तृष्णा-क्रोधाश्च जज्ञिरे ॥३१॥
दुःखोद्भवाः स्मृता ह्येते सर्वे वाधर्मलक्षणाः ।
नैषां भार्य्यास्ति पुत्रो वा सर्वे ते ह्यूर्द्ध्वरेतसः ॥३२॥
निर्ऋतिश्च तथा चान्या मृत्योर्भार्य्याभवन्मुने ।
अलक्ष्मीर्नाम तस्याञ्च मृत्योः पुत्राश्चतुर्दश ॥३३॥

व्यवसाय, शान्ति से क्षेम, सिद्धि से सुख और कीर्ति से यश—ये पुत्ररूप में उत्पन्न हुए । ये सब धर्म की सन्ततियाँ हैं । काम ने (संभवतः रति से) धर्म के पौत्ररूप में अत्यन्त आनन्दमय हर्ष को जन्म दिया ॥ २६-२८ ॥

अधर्म की पत्नी का नाम हिंसा था, जिसके गर्भ से अनृत नाम का पुत्र और निर्ऋति नाम की पुत्री की उत्पत्ति हुई । निर्ऋति ने नरक और भय नाम के दो पुत्रों को जन्म दिया ॥ २९ ॥

इसी निर्ऋति से माया और वेदना नामक कन्यामिथुन (एक साथ उत्पन्न दो पुत्रियों) की सृष्टि हुई । नरक तथा भय नामक पुत्र-मिथुन तथा माया और वेदना नामक कन्या-मिथुन—ये क्रमशः दाम्पत्य-बन्धन में बंध गये । इन मिथुनों में माया ने मृत्यु नामक पुत्र को जन्म दिया, जो कि भूतमात्र के प्राणों का संहारक हुआ ॥ ३० ॥

रौरव नरक नामक पति से वेदना का पुत्र उत्पन्न हुआ, जिसका नाम दुःख पड़ा और माया के पुत्र मृत्यु से व्याधि, जरा, शोक, तृष्णा तथा क्रोध नाम की सन्ततियाँ उत्पन्न हुईं ॥ ३१ ॥

यह मृत्यु की सन्तति पुराणों में दुःख से उद्भूत मानी जाती हैं और इन सबमें अधर्म के लक्षण पाये जाते हैं । इन सन्तति में जो पुत्र हैं, उनकी कोई पत्नी नहीं है और जो पुत्रियां हैं, उनके कोई पुत्र नहीं । इसलिए इस मृत्यु-सन्तान को ऊर्ध्वरेता (अथवा ब्रह्मचर्यनिष्ठ) कहा जाया करता है ॥ ३२ ॥

मुनिवर क्रौष्टुकि ! मृत्यु की एक पत्नी निर्ऋति थी और दूसरी पत्नी अलक्ष्मी थी । इस अलक्ष्मी के गर्भ से मृत्यु के चौदह पुत्र उत्पन्न हुए ॥ ३३ ॥

अलक्ष्मीपुत्रका ह्येते मृत्योरादेशकारिणः ।
विनाशकालेषु नरान् भजन्त्येते शृणुष्व तान् ।।३४।
इन्द्रियेषु दशस्वेते तथा मनसि च स्थिताः ।
स्वे स्वे नरं स्त्रियं वापि विषये योजयन्ति हि ।।३५।
अथेन्द्रियाणि चाक्रम्य रागक्रोधादिभिर्नरान् ।
योजयन्ति यथा हानिं यान्त्यधर्मादिभिर्द्विज ।।३६।
अहङ्कारगतश्चान्यस्तथान्यो बुद्धिसंस्थितः ।
विनाशाय नराः स्त्रीणां यतन्ते मोहसंश्रिताः ।।३७।
तथैवान्यो गृहे पुंसां दुःसहो नाम विश्रुतः ।
क्षुत्क्षामोऽधोमुखो नग्नश्चीरी काकसमस्वनः ।।३८।
स सर्वान् खादितुं सृष्टो ब्रह्मणा तमसो निधिः ।
दंष्ट्राकरालमत्यर्थं विवृतास्यं सुभैरवम् ।।३९।
तमत्तुकाममाहेदं ब्रह्मा लोकपितामहः ।
सर्वब्रह्ममयः शुद्धः कारणं जगतोऽव्ययः ।।४० ।

अलक्ष्मी के ये प्रिय पुत्र अपने पिता मृत्युदेव के आज्ञाकारी हैं और विनाशकाल के उपस्थित होने पर मानवों के सङ्ग-साथ लग जाते हैं। इनके सम्बन्ध में जो कह रहा हूँ सुनिए। ये अलक्ष्मी-पुत्र मनुष्य की पाँचों ज्ञानेन्द्रियों, पाँचों कर्मेन्द्रियों तथा उनके मन में निवास करते हैं और स्त्री तथा पुरुष दोनों को उनके विषय-भोगों में लगाया करते हैं। द्विजवर क्रौष्टुकि ! ये अलक्ष्मी-पुत्र मनुष्यों की इन्द्रियों पर आक्रमण करते हैं और राग-द्वेष, क्रोधादि को उनके साथ संयुक्त कर देते हैं, जिसके कारण मनुष्य अधर्माचरण में प्रवृत्त होकर बहुत हानि उठाया करते हैं ।। ३४-३६ ।।

अलक्ष्मी का (इन उपर्युक्त इग्यारह पुत्रों के अतिरिक्त) बारहवाँ पुत्र अहंकार के सङ्ग रहा करता है और तेरहवाँ बुद्धि के सङ्ग, जिसके परिणाम-स्वरूप पुरुष मोह के वशीभूत होकर नारियों के विनाश का प्रयत्न किया करते हैं ।। ३७ ।।

अलक्ष्मी का चौदहवाँ पुत्र; जिसका नाम 'दुःसह' है, मनुष्यों के गृहों में निवास करता है। यह भूख से दुर्बल शरीर, मुंह नीचे लटकाये, नङ्गा, चीथड़े लपेटे और कौए की सी कर्कश बोली वाला है। वस्तुतः यह तमोगुण की निधि है और इसकी सृष्टि ब्रह्मा प्रजापति ने सबका भक्षण करने के लिए की है। लोकपितामह ब्रह्मा ने, जो साक्षात् परब्रह्म स्वरूप, परमशुद्ध, जगत् कारण तथा अविनाशी है, उस विकराल दांतों वाले, बहुत अधिक मुंह बाये तथा बीभत्स रूप वाले 'दुःसह' को, सर्वभक्षण के लिए इच्छुक देख कर यह कहा ।। ३८-४० ।।

ब्रह्मोवाच—

नात्तव्यन्ते जगदिदं जहि कोपं शमं व्रज।
त्यजैनान्तामसीं वृत्तिमपास्य रजसः कलाम् ॥४१॥

दुःसह उवाच—

क्षुत्क्षामोऽस्मि जगन्नाथ ! पिपासुश्चापि दुर्बलः।
कथं तृप्तिमियान्नाथ ! भवेयं बलवान् कथम्।
कश्चाश्रयो ममाख्याहि वर्तेयं यत्र निर्वृतः ॥४२॥

ब्रह्मोवाच—

तवाश्रयो गृहं पुंसां जनश्चाधार्मिको बलम्।
पुष्टिं नित्यक्रियाहान्या भवान् वत्स ! गमिष्यति ॥४३॥
वृथास्फोटाश्च ते वस्त्रमाहारञ्च ददामि ते।
क्षतं कीटावपन्नञ्च तथा श्वभिरवेक्षितम् ॥४४॥
भग्नभाण्डगतन्तद्वन्मुखवातोपशामितम्।
उच्छिष्टापक्वमास्विन्नमवलीढमसंस्कृतम् ॥४५॥

ब्रह्मा प्रजापति की उक्ति--

अरे दुःसह ! इस जगत् को अपना ग्रास न बना। क्रोध छोड़। शान्त हो जा। रजोगुण के अंश हटाकर अपनी इस तामसी वृत्ति-प्रवृत्ति का परित्याग कर दे ॥ ४१ ॥

दुःसह बोला—

हे जगन्नाथ ! मैं भूख से बिलबिला रहा हूँ और मुझे प्यास लगी हुई है, मुझे कैसे तृप्ति मिले ! कैसे मैं बलवान् हो जाऊँ ? मैं कहां आश्रय लूं, जहां शान्तिपूर्वक मैं जी सकूँ ? कृपया इनके विषय में मुझे बता दें ॥ ४२ ॥

ब्रह्मा की उक्ति—

तुम्हारा आश्रय मनुष्य के गृह हैं, अधर्माचरण में लगे लोग तुम्हारे बल हैं। वत्स दुःसह ! मनुष्यों में नित्य धर्म-कर्म की हानि से तुम्हें पुष्टि प्राप्त हो गई ॥ ४३ ॥

तुम्हारे शरीर में अकारण निकले फोड़े-फफोले तुम्हारे वस्त्र का काम करेंगे। तुम्हारे भोजन के लिए मैं ऐसे पदार्थ दे रहा हूँ, जो क्षतिग्रस्त हो गये हों, जिनमें कीड़े लग गये हों तथा जिन्हें कुत्तों ने ललचायी आंखों से देखा हो ॥ ४४ ॥

तुम्हारी पुष्टि के लिए मैं जो भक्ष्य दे रहा हूँ वे ये हैं—टूटे-फूटे बर्तनों में रखे, मुंह की हवा से ठंढा किये, जूठे, कच्चे, पसीना गिरने से गीले, कुत्ते-बिल्ली के द्वारा चाटे गये, अच्छी तरह न पकाये गये, फटे-चिटे आसनों पर बैठे लोगों के द्वारा खाने के बाद

भग्नासनस्थितैर्भुक्तमासन्नागतमेव च ।
विदिङ्मुखं सन्ध्ययोश्च नृत्यवाद्यस्वनाकुलम् ।।४६।
उदक्योपहतं भुक्तमुदक्या दृष्टमेव च ।
यच्चोपघातवत् किञ्चिद् भक्ष्यं पेयमथापि वा ।।४७।
एतानि तव पुष्टयर्थमन्यच्चापि ददामि ते ।
अश्रद्धया हुतं दत्तमस्नातैर्यदवज्ञया ।।४८।
यन्नाम्बुपूर्वकं क्षिप्तमनर्थीकृतमेव च ।
त्यक्तुमाविष्कृतं यत् तु दत्तं चैवातिविस्मयात् ।।४९।
दुष्टं क्रुद्धार्तदत्तञ्च यक्ष तद्भागि तत् फलम् ।
यच्च पौनर्भवः किञ्चित् करोत्यामुष्मिकं क्रमम् ।।५०।
यच्च पौनर्भवा योषित् तद्यक्ष ! तव तृप्तये ।
कन्याशुल्कोपधानाय समुपास्ते धनक्रियाः ।।५१।
तथैव यक्ष ! पुष्टयर्थमसच्छास्त्रक्रियाश्च याः ।
यच्चार्थनिर्वृतं किञ्चिदधीतं यन्न सत्यतः ।।५२।

बचे, कहीं आस-पास से लाकर एकत्र किए, अनिर्दिष्ट दिग्भागों में रखे, प्रातःकाल और सायंकाल की सन्ध्याओं में नाचने-गाने-बजाने की ध्वनि के कारण व्यग्रता के उत्पादक, रजस्वला स्त्री से छुए गये, खाये गये अथवा देखे गये और इन सबके अतिरिक्त जो भी भक्ष्य अथवा पेय दूषित हो गये हों। इनके अतिरिक्त भी, अरे यक्ष ! मैं तुम्हारे भक्ष्य और पेय के लिये बहुत वस्तुएँ दे रहा हूँ ।। ४५-४७ ।।

तुम्हें जो दे रहा हूँ, वे ये वस्तुएँ हैं—विना स्नान-ध्यान किये लोगों द्वारा अश्रद्धापूर्वक अथवा तिरस्कारपूर्वक दिये यज्ञान्न, जल-प्रोक्षण के बिना यों ही तेरे खाने के लिये फेंके गये खाद्य पदार्थ, भोजन के सर्वथा अयोग्य भक्ष्य, फेंकने के लिए रखे गये अन्न, दाता के द्वारा बहुत गर्वपूर्वक दिये गये भोज्य, दूषित खाद्य पदार्थ तथा क्रोध अथवा कष्ट में पड़े लोगों द्वारा दिये गये खाद्यान्न, जिनके दान का फल दाता को ही मिलता है। तुम्हारी तृप्ति के लिये मैं कुछ और भी देता हूँ, जैसे कि विधवा होने के बाद पुनः विवाहित स्त्री के पुत्र द्वारा परलोक के लिए किए गए धर्म-कर्म से सम्बद्ध दान की वस्तुएँ और पुनर्विवाहित विधवा की पुत्री के द्वारा पारलौकिक सुख-प्राप्ति के निमित्त किए-करवाए गए अनुष्ठानों से सम्बद्ध दान-दक्षिणा की वस्तुएँ। तुम्हारी पुष्टि के लिए तुम्हें ऐसे लोगों को दे रहा हूँ, जो विवाह करने के पूर्व प्राप्त कन्याशुल्क से धनोपार्जन करते हैं और असच्छास्त्रों में प्रतिपादित क्रियाओं के अनुष्ठान में लगे रहते हैं। तुम्हारी सिद्धि के लिए स्वाध्याय (वेद) का अर्थज्ञान रहित अध्ययन दे रहा हूँ और ऐसा स्वाध्यायाध्ययन दे रहा हूँ, जो वस्तुतः असत्याध्ययन है। साथ ही साथ तुम्हारी तृप्ति-तुष्टि-सिद्धि के लिए उचित समय का भी निर्देश कर रहा हूँ ।। ४८-५२ ।।

तत सर्वं तव कालांश्च ददामि तव सिद्धये ।
गुर्व्विण्यभिगमे सन्ध्यानित्यकार्य्यव्यतिक्रमे ॥५३॥
असच्छास्त्रक्रियालापदूषितेषु च दुःसह ।
तवाभिभवसामर्थ्यं भविष्यति सदा नृषु ॥५४॥
पङ्क्तिभेदे वृथापाके पाकभेदे तथा क्रिया ।
नित्यञ्च गेहकलहे भविता वसतिस्तव ॥५५॥
अपोष्यमाणे च तथा भृत्ये गोवाहनादिके ।
असन्ध्याभ्युक्षितागारे काले त्वत्तो भयं नृणाम् ॥५६॥
नक्षत्रग्रहपीडासु त्रिविधोत्पातदर्शने ।
अशान्तिकपरान् यक्ष ! नरानभिभविष्यसि ॥५७॥
वृथोपवासिनो मर्त्या द्यूतस्त्रीषु सदा रताः ।
त्वद्भाषणोपकर्त्तारो वैडालव्रतिकाश्च ये ॥५८॥
अब्रह्मचारिणाधीतमिज्या चाविदुषा कृता ।
तपोवने ग्राम्यभुजां तथैवानिर्जितात्मनाम् ॥५९॥

अरे दुःसह ! तुम्हारा विजय-सामर्थ्य ऐसे लोगों पर सदा सफल होगा, जो गर्भिणी स्त्री से सहवास करते हों, संध्या-वन्दन प्रभृति नित्यकर्मों के अनुष्ठानों में व्यतिक्रम करते हों और जिनके हृदय असच्छास्त्र, असत्कर्म तथा असत्प्रलाप से दूषित हो गये हों ॥ ५३-५४ ॥

तुम्हारे कर्त्तव्य मनुष्यों में वैर-वैमनस्य उत्पन्न करना, केवल अपने पेट भरने के लिये भोजन बनाना और दूसरों की पाकक्रिया में गड़बड़ी पैदा करना होगा। तुम्हारे निवास का स्थान वे घर होंगे, जहाँ नित्य कलह होते हों ॥ ५५ ॥

ऐसे समय में लोग तुमसे भयभीत हुआ करेंगे, जब वे अपने भृत्यों तथा अपने गोधन किंवा वाहनोपयुक्त अश्वादि का भरण-पोषण न कर रहे हों और जब वे प्रातः और सायं—दोनों सन्ध्या कालों में अपने आवासस्थानों को जलादि से प्रक्षालित न कर रहे हों ॥ ५६ ॥

अरे यक्ष दुःसह ! सूर्य-चन्द्रादि के ग्रहण के समय तथा आधिभौतिक-आधिदैविक एवं आध्यात्मिक उत्पातों के दर्शन के समय शान्तिक कर्म का अनुष्ठान न करने वाले लोगों पर तेरे पराक्रम का प्रभाव पड़ा करेगा ॥ ५७ ॥

तेरे कहने के अनुसार वे लोग आचरण किया करेंगे, जो उपवास का ढोंग रचते हों, जुआ खेलने में सदा लगे रहते हों, सदा स्त्री-प्रसङ्ग करने में उद्यत रहते हों और वैडालव्रतिक (धर्मध्वजी) हों। तुम्हें वे सब फल प्राप्त होंगे, जो बिना ब्रह्मचर्य-पालन के वेदाध्ययन के फल हैं, बिना यज्ञानुष्ठान के कर्मज्ञान के यज्ञ-याग के ढोंग करने

ब्राह्मण-क्षत्रिय-विशां शूद्राणाञ्च स्वकर्मतः ।
परिच्युतानां या चेष्टा परलोकार्थमीप्सताम् ॥६०।
तस्याश्च यत् फलं सर्वं तत् ते यक्ष ! भविष्यति ।
अन्यच्च ते प्रयच्छामि पुष्टचर्थं सन्निबोध तत् ॥६१।
भवतो वैश्वदेवान्ते नामोच्चारणपूर्वकम् ।
एतत् तवेति दास्यन्ति भवतो बलिमूर्ज्जितम् ॥६२।
यः संस्कृताशी विधिवच्छुचिरन्तस्तथा बहिः ।
अलोलुपो जितस्त्रीकस्तद्गेहमपवर्जय ॥६३।
पूज्यन्ते हव्यकव्याभ्यां देवताः पितरस्तथा ।
यामयोऽतिथयश्चापि तद्गेहं यक्ष ! वर्जय ॥६४।
यत्र मैत्री गृहे बालवृद्धयोषिन्नरेषु च ।
तथा स्वजनवर्गेषु गृहं तच्चापि वर्जय ॥६५।
योषितोऽभिरता यत्र न बहिर्गमनोत्सुकाः ।
लज्जान्विताः सदा गेहं यक्ष ! तत् परिवर्जय ॥६६।

के फल हैं, तपोवन में निवास करते हुए अभक्ष्य-भक्षण करने के फल हैं, विषयभागों में निरत इन्द्रियों के वश में रहने के फल हैं और अपने-अपने कर्मों से च्युत ब्राह्मण-क्षत्रिय-वैश्य और शूद्र वर्ण के लोगों द्वारा स्वर्गप्राप्ति की चेष्टाओं के फल हैं। तेरी पुष्टि के लिए तुझे कुछ और भी दे रहा हूँ, जिसे अच्छी तरह समझ ले ॥ ५८-६१ ॥

बलिवैश्वदेव यज्ञ के अन्त में, तेरे नामोच्चार के साथ, 'यह दुःसह यक्ष के लिये है' ऐसा कह कर, तेरे लिये जो बलि-प्रदान होगा, वह प्रचुर मात्रा में होगा ॥ ६२ ॥

तू उस घर में कभी न जाना, जहाँ रहने वाले यज्ञ-संस्कृत अन्न का विधिवत् भोजन करते हों, बाह्य तथा आभ्यन्तर शुद्धि से शुद्ध-पवित्र हों, लोभी न हों और नारी-परायण (अजितेन्द्रिय) न हों ॥ ६३ ॥

तू उस घर में भी न घुसना जहाँ देवों और पितरों की हव्य-कव्य के द्वारा अर्चा-पूजा होती हो और जहाँ कुल से सम्बद्ध नारियों और अतिथि-महानुभावों का सम्मान-सत्कार होता हो ॥ ६४ ॥

उस घर में भी तू प्रवेश न करना, जहाँ रहने वाले बच्चों-बूढ़ों-स्त्रियों और पुरुषों में परस्पर मैत्रीभाव हो और स्वजनवर्ग के प्रति भी मित्रता का व्यवहार होता हो ॥ ६५ ॥

यक्ष ! तू उस घर में कभी न जाना, जहाँ रहने वाली नारियाँ पति-पुत्र-प्रेम में प्रसन्न रहती हों, कहीं बाहर जाने के लिए उत्कण्ठित न होती हों और लज्जावती हों ॥ ६६ ॥

वयःसम्बन्धयोग्यानि शयनान्यशनानि च ।
यत्र गेहे त्वया यक्ष ! तद्वर्ज्यं वचनान्मम ।।६७।

यत्र कारुणिका नित्यं साधुकर्मण्यवस्थिताः ।
सामान्योपस्करैर्युक्तास्त्यजेथा यक्ष ! तद्गृहम् ।।६८।

यत्रासनस्थास्तिष्ठत्सु गुरु-वृद्ध-द्विजातिषु ।
न तिष्ठन्ति गृहं तच्च वर्ज्यं यक्ष ! त्वया सदा ।।६९।

तरुगुल्मादिभिर्द्वारं न विद्धं यस्य वेश्मनः ।
मर्मभेदोऽथवा पुंसस्तच्छ्रेयो भवनं न ते ।।७०।

देवतापितृभृत्यानामतिथीनाञ्च वर्तनम् ।
यस्यावशिष्टेनान्नेन पुंसस्तस्य गृहं त्यज ।।७१।

सत्यवाक्यान् क्षमाशीलानहिंस्रान्नानुतापिनः ।
पुरुषानीदृशान् यक्ष ! त्यजेथाश्चानसूयकान् ।।७२।

मेरे आदेशानुसर तू उस घर में भी प्रवेश न करना, जहाँ अवस्था तथा सम्बन्ध के अनुरूप शयन और आसन की व्यवस्था स्थापित हो ॥ ६७ ॥

यक्ष ! उस घर में जाना भी तू छोड़ देना, जहाँ रहने वाले दयार्द्रहृदय हों, सदाचार-परायण हों तथा जीवन-यापन के साधारण साधन रखते हों ॥ ६८ ॥

यक्ष ! तू उस घर में प्रवेश करना भी बंद कर देना, जहाँ गुरुजन, वृद्ध तथा विप्र के खड़े रहते ओर लोग आसन पर न बैठा करते हों अथवा गुरुजनादि के आसनस्थ रहते ओर लोग आसन पर न बैठते हों ॥ ६९ ॥

तुम्हारे लिये उस भवन में प्रवेश भी श्रेयस्कर नहीं, जिसके द्वार पेड़-पौधे तथा लतागुल्मों से आच्छन्न न हों और जहाँ रहने वाले परस्पर मर्मान्तिक वचन तथा कर्म में प्रवृत्त न होते हों ॥ ७० ॥

तू उस व्यक्ति का भी घर छोड़ दे, जो अपने अन्न से देवों पितरों भृत्यों तथा अतिथियों का तर्पण करता हो और उसके बाद अवशिष्ट अन्न से अपना भरण-पोषण करता हो ॥ ७१ ॥

यक्ष ! तू ऐसे लोगों के पास न फटकना जो सत्यवादी हों, क्षमाशील हों, अहिंसक हों, किसी दुष्कर्म के लिये पश्चात्ताप न करते हों और परनिन्दा से विमुख रहते हों ॥ ७२ ॥

भर्तृशुश्रूषणे युक्तामसत्स्त्रीसङ्गवर्जिताम् ।
कुटुम्बभर्तृशेषान्नपुष्टाञ्च त्यज योषितम् ॥७३॥
यजनाध्ययनाभ्यासदानासक्तमतिं सदा ।
याजनाध्यापनादानकृतवृत्तिं द्विजं त्यज ॥७४॥
दानाध्ययनयज्ञेषु सदोद्युक्तञ्च दुःसह ।
क्षत्रियं त्यज सच्छुल्कशस्त्राजीवात्तवेतनम् ॥७५॥
त्रिभिः पूर्वगुणैर्युक्तं पाशुपाल्य-वणिज्ययोः ।
कृषेश्चावाप्तवृत्तिञ्च त्यज वैश्यमकल्मषम् ॥७६॥
दानेज्या-द्विजशुश्रूषा-तत्परं यक्ष ! सन्त्यज ।
शूद्रञ्च ब्राह्मणादीनां शुश्रूषावृत्तिपोषकम् ॥७७॥
श्रुतिस्मृत्यविरोधेन कृतवृत्तिर्गृहे गृही ।
यत्र तत्र च तत्पत्नी तस्यैवानुगतात्मिका ॥७८॥

तू उस नारी के पास भी न पहुँचना, जो पति की सेवाशुश्रूषा में लगी रहती हो, असदाचार वाली स्त्रियों का सङ्ग-साथ न करती हो और अपने पति तथा परिवार के भोजन कर लेने के बाद अवशिष्ट भोजन करने में प्रसन्न रहा करती हो ॥ ७३ ॥

तू उस ब्राह्मण से सदा दूर रहा कर, जिसकी बुद्धि यज्ञानुष्ठान, वेदाध्ययन, वेदार्थचिन्तन तथा दानकर्म में लगी रहती हो और जिसकी जीविका ऋत्विक्-कर्म, वेदाध्यापन तथा दान-ग्रहण से चला करती हों ॥ ७४ ॥

अरे दुःसह यक्ष ! तू उस क्षत्रिय के समीप कभी न जाना, जो दान देने, स्वाध्याय के अध्ययन करने और यज्ञानुष्ठान में सदा तत्पर रहता हो और जिसकी जीविका अपनी प्रजा से शास्त्रविहित कर-ग्रहण करने तथा शस्त्रधारण से राजा द्वारा प्राप्त वेतन से चलती हो ॥ ७५ ॥

तू उस वैश्य को छोड़ देना, जो दानशीलता, वेदाध्ययन-परायणता तथा यज्ञानुष्ठान-तत्परता के पूर्वोक्त तीन गुणों से युक्त हो, जिसकी जीविका पशुपालन, वाणिज्य तथा कृषिकर्म से चलती हो और जिसमें छल-छद्म का कोई कालुष्य न हो ॥ ७६ ॥

अरे यक्ष ! तू उस शूद्र का भी परित्याग कर दे, जो दान, यज्ञ तथा द्विजशुश्रूषा में तत्पर रहता हो और जिसकी जीविका ब्राह्मणादि की सेवा-शुश्रूषा पर निर्भर हो ॥ ७७ ॥

यक्ष ! तू उस घर की ओर आँख उठा कर भी न देखना, जहाँ रहने वाला गृहस्थ श्रुति और स्मृति की आज्ञा-अनुज्ञा के अनुसार जीविका के लिए धनोपार्जन

यत्र पुत्रो गुरोः पूजां देवानाञ्च तथा पितुः।
पत्नी च भर्तुः कुरुते तत्रालक्ष्मीभयं कुतः ॥७९॥
सदानुलिप्तं सन्ध्यासु गृहमम्बुसमुक्षितम्।
कृतपुष्पबलिं यक्ष! न त्वं शक्नोषि वीक्षितुम् ॥८०॥
भास्करादृष्टशय्यानि नित्याग्निसलिलानि च।
सूर्य्यावलोकदीपानि लक्ष्म्या गेहानि भाजनम् ॥८१॥
यत्रोक्षा चन्दनं वीणा आदर्शो मधुसर्पिषी।
विषाज्यताम्रपात्राणि तद्गृहं न तवाश्रयः ॥८२॥
यत्र कण्टकिनो वृक्षा यत्र निष्पाववल्लरी।
भार्य्या पुनर्भूर्वल्मीकस्तद्यक्ष! तव मन्दिरम् ॥८३॥
यस्मिन् गृहे नराः पञ्च स्त्रीत्रयं तावतीश्च गाः।
अन्धकारेन्धनाग्निश्च तद्गृहं वसतिस्तव ॥८४॥

करता हो, जिसकी धर्मपत्नी सदा उसका अनुगमन करने वाली हो, जिसका पुत्र गुरु, देवता तथा पिता की पूजा करने वाला हो और जिसकी पुत्रवधू अपने पति की सेवा में लगी रहती हो। ऐसे घर में अलक्ष्मी अथवा दरिद्रता का भय कहाँ ? उस घर में जो लिपा-पुता साफ-सुथरा रहता हो, प्रातः तथा सायं–दोनों सन्ध्याकालों में जलप्रोक्षण से पवित्र किया जाता हो और जहाँ देवपूजन के निमित्त पुष्पोपहार तथा भूतबलि के कार्य सम्पन्न किये जाते हों, अलक्ष्मी (दरिद्रता) का भय कदापि नहीं घुस सकता ॥ ७८-८० ॥

लक्ष्मी के निवास के योग्य वे घर होते हैं, जहाँ सूर्य की किरणें गृहवासियों की शय्या पर नहीं पड़ा करती, जहाँ नित्य अग्नि प्रज्वलित रहती है, जहाँ पर्याप्त जल रखा रहता है और जहाँ सूर्य भगवान् को आरती दिखायी जाया करती है ॥ ८१ ॥

अरे दुःसह ! वह घर भी तेरा आश्रय-स्थान नहीं, जहाँ वृषभ (बैल) बंधा हो, चन्दन रखा हो, वीणा दिखायी देती हो, दर्पण रखा हो, मधुपूर्ण तथा घृतपूर्ण पात्र पड़े हों और जहाँ विष के लिए तथा यज्ञार्थ घृत के लिए ताम्रपात्र अलग-अलग रखे हों ॥ ८२ ॥

तेरा मन्दिर तो वह घर है, जहाँ कटीले पेड़-पौध जमें हों, जहाँ निष्पाव की लताएँ फैली हों, जहाँ की गृहिणी पुनर्विवाहित विधवा स्त्री हो और जहाँ दीमक के बनाये ढूह पड़े हों ॥ ८३ ॥

तुम्हारे रहने योग्य वह घर है, जहाँ पाँच पुरुष और तीन स्त्रियों का निवास हो, जहाँ तीन गाएँ बँधी हों और जहाँ भोजन बनाने के लिए अंधेरे में इन्धन जलाया जाया करता हो ॥ ८४ ॥

एकच्छागं द्विवालेयं त्रिगवं पञ्चमाहिषम् ।
षडश्वं सप्तमातङ्गं गृहं यक्षाशु शोषय ॥८५॥
कुद्दालदात्रपिटकं तद्वत् स्थाल्यादिभाजनम् ।
यत्र तत्रैव क्षिप्तानि तव दद्युः प्रतिश्रयम् ॥८६॥
मुसलोलूखले स्त्रीणामास्या तद्वदुदुम्बरे ।
अवस्करे मन्त्रणञ्च यक्षैतदुपकृत् तव ॥८७॥
लङ्घ्यन्ते यत्र धान्यानि पक्वापक्वानि वेश्मनि ।
तद्वच्छास्त्राणि तत्र त्वं यथेष्टं चर दुःसह ॥८८॥
स्थालीपिधाने यत्राग्निर्दत्तो दर्व्वीफलेन वा ।
गृहे तत्र दुरिष्टानामशेषाणां समाश्रयः ॥८९॥
मानुषास्थि गृहे यत्र दिवारात्रं मृतस्थितिः ।
तत्र यक्ष ! तवावासस्तथान्येषाञ्च रक्षसाम् ॥९०॥
अदत्त्वा भुञ्जते ये वै बन्धोः पिण्डं तथोदकम् ।
सपिण्डान् सोदकांश्चैव तत्काले तान् नरान् भज ॥९१॥

यक्ष ! तू उस घर का शीघ्र शोषण कर, जहाँ एक बकरी, दो गधे, तीन गाय, पाँच भैंस, छः घोड़े और सात हाथी दिखायी पड़े ॥ ८५ ॥

तुझे वे घर शरण देंगे, जिनमें कुदाली, खुरपी, पेटारी, थाली आदि बर्तन इधर-उधर फेंके दिखायी पड़े ॥ ८६ ॥

अरे यक्ष ! तुम्हारे लिये वे घर बड़े उपकरी हैं जहाँ मूसर, ओखर, गूलर के बने चौखट तथा कूड़ा-कर्कट की जगहों पर स्त्रियों की बैठक और इधर-उधर की बात-चीत होती हो ॥ ८७ ॥

अरे दुःसह ! तू उन घरों में स्वच्छन्द रूप से विचरण कर, जहाँ लोग भोजन के लिये पकाए गए या खेतों से लाकर रखे गये धान्य लाँघा करते हों और साथ ही साथ जहाँ धर्मशास्त्रों की आज्ञा का उल्लंघन किया जाया करता हो ॥ ८८ ॥

वह घर सभी प्रकार के अपशकुनों का आवास है, जिसमें पतीली के ढक्कन पर आग पड़ी हो या कलछुल से उठाकर उस पर आग रखती जाती हो ॥ ८९ ॥

जिस घर में मनुष्य की हड्डी पड़ी हो और दिन-रात कोई शव पड़ा हो, वहाँ अरे यक्ष ! तुम्हारा और तुम्हारे साथ और राक्षसों का डेरा डालना ठीक है ॥ ९० ॥

दुःसह ! तुम उन मनुष्यों के साथ उस समय रहो, जब वे अपने बन्धु-बान्धवों के लिए पिण्डदान तथा जलाञ्जलि दिये बिना भोजन करते हों और अपने सपिण्डों तथा समानोदकों को भोजन न कराते हों ॥ ९१ ॥

यत्र पद्ममहापद्मौ सुरभिर्मोदकाशिनी ।
वृषभैरावतौ यत्र कल्प्यन्ते तद्गृहं त्यज ॥९२।
अशस्त्रा देवता यत्र सशस्त्राश्चाहवं विना ।
कल्प्यन्ते मनुजैरर्च्यास्तत् परित्यज मन्दिरम् ॥९३।
पौरजानपदैर्यत्र प्राक्प्रसिद्धमहोत्सवाः ।
क्रियन्ते पूर्ववद् गेहे न त्वं तत्र गृहे चर ॥९४।
शूर्पवातघटाम्भोभिः स्नानं वस्त्राम्बुविप्रुषैः ।
नखाग्रसलिलैश्चैव तान् याहि हतलक्षणान् ॥९५।
देशाचारान् समयान् ज्ञातिधर्मं
जपं होमं मङ्गलं देवतेष्टिम् ।
सम्यक्शौचं विधिवल्लोकवादान्
पुंसस्त्वया कुर्वतो माऽस्तु सङ्गः ॥९६।

यक्ष ! तू उस घर में जाना छोड़ देना, जिसकी दीवारों पर पद्म, महापद्म, प्रसन्नमुख वाली गौ, वृषभ तथा ऐरावत हाथी के भित्तिचित्र दिखायी देते हों ॥ ९२ ॥

तू उस घर को भी छोड़ देना, जिसमें लोग पूजा के लिए ऐसी देवमूर्तियाँ दीवालों पर बनाते हों, जिनके हाथों में या तो शस्त्र न हों अथवा यदि शस्त्र हों तो युद्ध का कोई दृश्य न दिखाया गया हो ॥ ९३ ॥

तू उस घर में कभी विचरण न करना, जहाँ पौर-जानपद लोग प्राचीन काल के प्रसिद्ध महोत्सवों का, पहले जैसा, आयोजन किया करते हों ॥ ९४ ॥

तू उन अभागे लोगों के पास जा, जो सूप के फटकने से पैदा हुई हवा लगने से ही मान लेते हों कि स्नान हो गया, जो यदि सचमुच स्नान करते हों तो घड़े में रखे पानी से स्नान करते हों, जो कपड़े निचोड़ने में गिरी पानी की बूँदों से देह पोंछ लेते हों और नख के अग्रभाग से छिड़के गये पानी के छींटों से ही स्नान-क्रिया की समाप्ति समझ लेते हों ॥ ९५ ॥

ऐसे लोगों का सङ्ग-साथ तेरे लिये वर्जित है, जो लोकाचार, शास्त्रविहित आचार, कुलधर्म, जप, होम, माङ्गलिक कार्य, देवयज्ञ, समीचीन रूप से बाह्याभ्यन्तर-शुद्धि—इन सब कार्यों में लगे रहते हैं और अपने (सदाचार विषयक) वार्तालाप से लोगों के (अनर्गल) आलाप-संलाप को नियन्त्रित किया करते हैं ॥ ९६ ॥

मार्कण्डेय उवाच—

इत्युक्त्वा दुःसहं ब्रह्मा तत्रैवान्तरधीयत।
चकार शासनं सोऽपि तथा पङ्कजजन्मनः ॥९७।

इति श्रीमार्कण्डेयपुराणे यक्षानुशासनो नाम पञ्चाशोऽध्यायः।

महामुनि मार्कण्डेय ने कहा—

ब्रह्मा ने दुःसह को ये सब बातें बतायीं और उसके बाद वे अन्तर्हित हो गए। दुःसह ने भी पद्मयोनि ब्रह्मा प्रजापति के आदेश के ही अनुसार अपना आचार-व्यवहार बना लिया॥ ९७॥

पर्यालोचन

(क) मार्कण्डेयपुराण के इस अध्याय के श्लोकों को ध्यान में रखकर श्रीविष्णु-पुराण के प्रथम अंश के सप्तम अध्याय के नीचे लिखे श्लोकों पर दृष्टिपात कीजिए—

'ततोऽभिध्यायतस्तस्य जज्ञिरे मानसाः प्रजाः।
तच्छरीरसमुत्पन्नैः कार्यैस्तैः करणैः सह॥

क्षेत्रज्ञाः समवर्तन्त गात्रेभ्यस्तस्य धीमतः।
ते सर्वे समवर्तन्त ये मया प्रागुदाहृताः॥

देवाद्याः स्थावरान्ताश्च त्रैगुण्यविषये स्थिताः।
एवंभूतानि सृष्टानि चराणि स्थावराणि च॥

यदास्य ताः प्रजाः सर्वा न व्यवर्धन्त धीमतः।
अथान्यान् मानसान् पुत्रान् सदृशानात्मनोऽसृजत्॥

भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा।
मरीचिं दक्षमत्रिञ्च वसिष्ठं चैव मानसान्॥

नव ब्रह्माण इत्येते पुराणे निश्चयं गताः।
ख्यातिं भूतिं च संभूतिं क्षमां प्रीतिं तथैव च॥

सन्नतिं च तथैवोर्ज्जामनसूयां तथैव च।
प्रसूतिं च ततः सृष्ट्वा ददौ तेषां महात्मनाम्॥

पत्न्यो भवध्वमित्युक्त्वा तेषामेव तु दत्तवान्।
सनन्दनादयो ये च पूर्वसृष्टास्तु वेधसा॥

न ते लोकेष्वसज्जन्त निरपेक्षाः प्रजासु ते।
सर्वे तेऽभ्यागतज्ञाना वीतरागा विमत्सराः॥

तेष्वेवं निरपेक्षेषु लोकसृष्टौ महात्मनः।
ब्रह्मणोऽभून्महान् क्रोधस्त्रैलोक्यदहनक्षमः॥
....

भ्रुकुटिकुटिलात्तस्य ललाटात् क्रोधदीपितात्।
समुत्पन्नस्तदा रुद्रो मध्याह्नार्कसमप्रभः॥

अर्धनारीनरवपुः प्रचण्डोऽतिशरीरवान्।
विभजात्मानमित्युक्त्वा तं ब्रह्माऽन्तर्दधे ततः॥

तथोक्तोऽसौ द्विधा स्त्रीत्वं पुरुषत्वं तथाकरोत्।
बिभेद पुरुषत्वं च दशधा चैकधा पुनः॥

सौम्यासौम्यैस्तदा शान्ताशान्तैः स्त्रीत्वं च स प्रभुः।
बिभेद बहुधा देवः स्वरूपैरसितैः सितैः॥

ततो ब्रह्मात्मसंभूतं पूर्वं स्वायम्भुवं प्रभुः ।
आत्मानमेव कृतवान् प्राजापाल्ये मनुं द्विज ॥

शतरूपां च तां नारीं तपोनिर्धूतकल्मषाम् ।
स्वायम्भुवो मनुर्देवः पत्नीत्वे जगृहे प्रभुः ॥

तस्मात्तु पुरुषाद् देवी शतरूपा व्यजायत ।
प्रियव्रतोत्तानपादौ प्रसूत्याकूतिसंज्ञितम् ॥

कन्याद्वयं च धर्मज्ञ रूपौदार्यगुणान्वितम् ।
ददौ प्रसूतिं दक्षाय आकूतिं रुचये पुरा ॥

प्रजापतिः स जग्राह तयोर्जज्ञे सदक्षिणः ।
पुत्रो यज्ञो महाभाग दम्पत्योर्मिथुनं ततः ॥

यज्ञस्य दक्षिणायां तु पुत्रा द्वादश जज्ञिरे ।
यामा इति समाख्याता देवाः स्वायम्भुवे मनौ ॥

प्रसूत्यां च तथा दक्षश्चतस्रो विंशतिस्तथा ।
ससर्ज कन्यास्तासां च सम्यङ्नामानि मे श्रृणु ॥

श्रद्धा लक्ष्मीर्धृतिस्तुष्टिर्मेधा पुष्टिस्तथा क्रिया ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिस्त्रयोदशी ॥

पत्न्यर्थं प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः ।
ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः ॥

ख्यातिस्सत्यथ संभूतिः स्मृतिः प्रीतिः क्षमा तथा ।
सन्ततिश्चानसूया च ऊर्ज्जा स्वाहा स्वधा तथा ॥

भृगुर्भवो मरीचिश्च तथा चैवाङ्गिरा मुनिः ।
पुलस्त्यः पुलहश्चैव क्रतुश्चर्षिवरस्तथा ॥

अत्रिर्वसिष्ठो वह्निश्च पितरश्च यथाक्रमम् ।
ख्यात्याद्याः जगृहुः कन्या मुनयो मुनिसत्तम ॥

श्रद्धा कामं चला दर्पं नियमं धृतिरात्मजम् ।
सन्तोषञ्च तथा तुष्टिर्लोभं पुष्टिरसूयत ।
मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च ॥

बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम् ।
व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत ॥

सुखं सिद्धिर्यशः कीर्तिरित्येते धर्मसूनवः ।
कामाद्रतिः सुतं हर्षं धर्मपौत्रमसूयत ॥

हिंसा भार्या त्वधर्मस्य ततो जज्ञे तथाऽनृतम् ।
कन्या च निकृतिस्ताभ्यां भयं नरकमेव च ॥

माया च वेदना चैव मिथुनं त्विदमेतयोः ।
तयोर्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ॥

वेदना स्वसुतं चापि दुःखं जज्ञेऽथ रौरवात् ।
मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे ॥

दुःखोत्तराः स्मृता ह्येते सर्वे चाधर्मलक्षणाः ।
नैषां पुत्रोऽस्ति वै भार्या ते सर्वे ह्यूर्ध्वरेतसः ॥'

दोनों पुराणों के श्लोकों में शब्दार्थ-विन्यास की प्रायः बहुत अधिक समानता है। मार्कण्डेयपुराणकार ने, सम्भवतः, यहाँ शब्दापहरण और अर्थापहरण नहीं किया है, अपितु विष्णुपुराण को प्रमाण मानकर, ब्रह्मा प्रजापति की मानसी-सृष्टि के प्रकरण को अविकल रूप से अपना लिया है। पुराणों के युग में आधुनिक लेखन शैली अथवा मुद्रण-प्रणाली का सर्वथा अभाव था और इसलिए उद्धृत संदर्भ का सूचक चिह्नों द्वारा अङ्कन भी असम्भव था।

. (ख) मार्कण्डेयपुराण की अपेक्षा पुराण-क्रम-गणना में प्राचीन वायुपुराण का भी निम्नलिखित देवसृष्टि-वर्णनविषयक प्रकरण का सन्दर्भ उद्धरणीय है, जो कि ब्रह्मा प्रजापति की मानसी-सृष्टि से सम्बद्ध है—

'ततोऽभिध्यायतस्तस्य जज्ञिरे मानसी प्रजाः ।
तच्छरीरसमुत्पन्नैः कार्यैस्तैः कारणैः सह ॥

क्षेत्रज्ञाः समवर्तन्त गात्रेभ्यस्तस्य धीमतः ।
ततो देवासुरपितॄन् मानवञ्च चतुष्टयम् ॥
सिसृक्षुरम्भांस्येतानि(तांश्च)स्वात्मना समयूयुजत् ॥
....

एवम्भूतानि सृष्टानि चराणि स्थावराणि च ।
यदाऽस्य ताः प्रजाः सृष्टा न व्यवर्धन्त धीमतः ॥

तदान्यान् मानसान् पुत्रान् सदृशानात्मनोऽसृजत् ।
भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसं तथा ॥
मरीचिं दक्षमत्रिञ्च वसिष्ठं चैव मानसम् ॥

नव ब्रह्माण इत्येते पुराणे निश्चयं गताः ।
....

ततोऽसृजत् पुनर्ब्रह्मा रुद्रं रोषात्मसम्भवम् ।
सङ्कल्पं चैवं धर्मं च पूर्वेषामपि पूर्वजः ॥

अग्रे ससर्ज वै ब्रह्मा मानसानात्मनः समान् ।
सनन्दनं ससनकं विद्वांसं च सनातनम् ।
न ते लोकेषु सज्जन्ते निरपेक्षाः सनातनाः ॥

सर्वे ते ह्यागतज्ञाना वीतरागा विमत्सराः ।
तेष्वेवं निरपेक्षेषु लोकवृत्तानुकारणात् ॥

हिरण्यगर्भो भगवान् परमेष्ठी ह्यचिन्तयत् ।
तस्य रोषात्समुत्पन्नः पुरुषोऽर्कसमद्युतिः ।
अर्द्धनारीनरवपुस्तेजसा ज्वलनोपमः ॥

सर्वं तेजोमयं जातमादित्यसमतेजसम् ।
विभजात्मानमित्युक्त्वा तत्रैवान्तरधीयत ॥

एवमुक्त्वा द्विधाभूतः पृथक् स्त्री पुरुषः पृथक् ।
स चैकादशधा जज्ञे अर्द्धमात्मानमीश्वरः ॥
....

स वैराजः प्रजासर्गः स सर्गे पुरुषो मनुः ।
वैराजात्पुरुषाद् वीराच्छतरूपा व्यजायत ॥

प्रियव्रतोत्तानपादौ पुत्रौ पुत्रवतां वरौ ।
कन्ये द्वे च महाभागे याभ्यां जाताः प्रजास्त्विमाः ॥

देवी नाम्ना तथाकूतिः प्रसूतिश्चैव ते शुभे ।
स्वायम्भुवः प्रसूतिं तु दक्षाय व्यसृजत् प्रभुः ॥

प्राणो दक्षस्तु विज्ञेयः सङ्कल्पो मनुरुच्यते ।
....

रुचेः प्रजापतेश्चैव आकूतिं प्रत्यपादयत् ॥
आकूत्यां मिथुनं जज्ञे मानसस्य रुचेः शुभम् ।
यज्ञश्च दक्षिणा चैव यमकौ संबभूवतुः ॥

यज्ञस्य दक्षिणायाञ्च पुत्रा द्वादश जज्ञिरे ।
यामा इति समाख्याता देवाः स्वायम्भुवेऽन्तरे ॥
....

तस्यां कन्याश्चतुर्विंशद्दक्षस्त्वजनयत् प्रभुः ।
सर्वास्ताश्च महाभागाः सर्वाः कमललोचनाः ॥

योगपत्न्यश्च तास्सर्वाः सर्वास्ता योगमातरः ।
श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ॥
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिस्त्रयोदशी ॥

पत्न्यर्थे प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः ।
....

ताभ्यः शिष्टा यवीयस्य एकादश सुलोचनाः ।
ख्यातिः सत्यथ सम्भूतिः स्मृतिः प्रीतिः क्षमा तथा ॥

सन्नतिश्चानसूया च ऊर्ज्जा स्वाहा स्वधा तथा ।
तास्ततः प्रत्यपद्यन्त पुनरन्ये महर्षयः ॥
रुद्रो भृगुर्मरीचिश्च अङ्गिरा पुलहः क्रतुः ।
पुलस्त्योऽत्रिर्वसिष्ठश्च पितरोऽग्निस्तथैव च ॥
....

श्रद्धा कामं विजज्ञे वै दर्पो लक्ष्मीसुतः स्मृतः ।
धृत्यास्तु नियमः पुत्रस्तुष्ट्याः सन्तोष उच्यते ॥
पुष्ट्या लाभः सुतश्चापि मेधापुत्रः श्रुतस्तथा ।
क्रियायास्तु नयः प्रोक्तो दण्डः समय एव च ॥
बुद्धेर्बोधः सुतश्चापि अप्रमादश्च तावुभौ ।
लज्जाया विनयः पुत्रो व्यवसायो वपुःसुतः ॥
क्षेमः शान्तिसुतश्चापि सुखं सिद्धेर्व्यजायत ।
यशः कीर्तेः सुतश्चापि इत्येते धर्मसूनवः ॥
....

जज्ञे हिंसा त्वधर्माद्वै निकृतिश्चानृतावुभौ ।
निकृत्यानृतयोर्जज्ञे भयं नरक एव च ॥
माया च वेदना चापि मिथुनद्वयमेतयोः ।
भयाज्जज्ञेऽथ सा माया मृत्युं भूतापहारिणम् ॥
वेदनायास्ततश्चापि दुःखं जज्ञेऽथ रौरवात् ।
मृत्योर्व्याधिजराशोकाः क्रोधोऽसूया च जज्ञिरे ॥
दुःखान्तराः स्मृता ह्येते सर्वे चाधर्मलक्षणाः ॥'

मार्कण्डेयपुराण के इस अध्याय के बहुत अधिक श्लोक उपर्युक्त वायुपुराण के श्लोकों से, शब्द और अर्थ—दोनों की दृष्टि से, मिलते-जुलते हैं। ऐसा प्रतीत होता है मानों मार्कण्डेयपुराणकार ने इन श्लोकों को तो अविकल रूप से अपना लिया है और कुछ श्लोकों के अभिप्राय अपनी शब्दार्थयोजना द्वारा प्रकाशित किया है।

(ग) इस अध्याय में 'यक्षानुशासन' से सम्बद्ध लोकाचार और लोक-विश्वास की कुछ ऐसी बातें हैं, जो आज भी भारत के ग्राम्य-जीवन में पुराणों की प्राचीन लोक-मर्यादा के अनुपालन को प्रमाणित करती हैं। उदाहरण के लिए निम्नलिखित श्लोक द्रष्टव्य है—

'यत्र पद्ममहापद्मौ सुरभिर्मोदकाशिनी ।
वृषभैरावतौ यत्र कल्प्यन्ते तद्गृहं त्यज ॥'

अर्थात् अरे यक्ष ! तू उस घर में जाना छोड़ देना, जिसकी दीवारों पर पद्म, महापद्म, प्रसन्नमुखवाली गौ, वृषभ तथा ऐरावत हाथी के भित्तिचित्र दिखायी देते हों।'

आज भी प्रायः भारत के चतुर्दिक् ग्रामों में बने आवास गृहों के बाहर कमल, गौ, वृषभ तथा हाथी आदि के चित्र देखे जा सकते हैं। इन चित्रों की रचना के पीछे जो भावना अथवा धारणा है, वह यही है कि ये चित्र शुभ शकुन के सूचक चित्र हैं और इनके रहने से भूत-प्रेतादि बाधा का निराकरण होता है।

इसी प्रकार वसन्तोत्सव, शारदोत्सव, दीपोत्सव आदि के आयोजन भी पौराणिक परम्परा की ही देन हैं। इन उत्सवों के आयोजन माङ्गलिक माने जाते हैं। इनके माङ्गलिक माने जाने का अभिप्राय यही है कि इनके द्वारा आधिभौतिक-आधिदैविक विपदाओं पर विजय पायी जा सकती है।

साथ ही साथ यक्ष के प्रवेश के योग्य जनावासों का जो निर्देश है, वह भी आजकल ग्राम्य-जीवन में लोक-विश्वास में स्पष्ट परिलक्षित होता है। इस अध्याय के श्लोकों (८६-८७) में जो यह उल्लेख है कि जिन घरों में कुदाली, खुरपी, पेटारी और थाली आदि पात्र इधर-उधर अस्त-व्यस्त पड़े हों और जिन घरों की स्त्रियाँ मूसर, ओखर तथा कूड़ा-करकट की ढेर पर बैठ कर इधर-उधर की गप मारती हों, वे घर अशुभ के आवास हैं, वह आज भी ग्रामीण जनता के विश्वासों में जीवित-जागृत हैं। आज भी लोग ऐसे दृश्य देखकर नाक-भौं सिकोड़ते हैं। इसी प्रकार शुभाशुभ-सूचक अनेकानेक उल्लेख, जो कि इस अध्याय के यक्षानुशासन के प्रकरण में मिलते हैं, आजकल भी ग्राम्य-जीवन में पुराणों के हितोपदेश के रूप में मान्य हैं। ऐसा प्रतीत होता है मानो पुराणों से अपरिचित भी भारत का ग्रामीण जनता पुराणों की प्रवहमान मर्यादा का पालन करती आ रही है और करती चली जायेगी।

॥ श्री मार्कण्डेयपुराण के 'यक्षानुशासन' नामक ५० वें अध्याय का सपर्यालोचन हिन्दी-अनुवाद समाप्त ॥

एकपञ्चाशोऽध्यायः

मार्कण्डेय उवाच—

दुःसहस्याभवद्भार्य्या निर्माष्टिर्नाम नामतः ।
जाता कलेस्तु भार्य्यायामृतौ चाण्डालदर्शनात् ।।१।
तयोरपत्यान्यभवन् जगद्व्यापीनि षोडश ।
अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः ।।२।
दन्ताकृष्टिस्तथोक्तिश्च परिवर्तस्तथापरः ।
अङ्गध्रुक् शकुनिश्चैव गण्डप्रान्तरतिस्तथा ।।३।
गर्भहा सस्यहा चान्यः कुमारास्तनयास्तयोः ।
कन्याश्चान्यास्तथैवाष्टौ तासां नामानि मे शृणु ।।४।
नियोजिका वै प्रथमा तथैवान्या विरोधिनी ।
स्वयंहारकरी चैव भ्रामणी ऋतुहारिका ।।५।
स्मृतिबीजहरे चान्ये तयोः कन्येऽतिदारुणे ।
विद्वेषण्यष्टमी नाम कन्या लोकभयावहा ।।६।

महामुनि मार्कण्डेय ने आगे कहा—

द्विजोत्तम क्रौष्टुकि ! दुःसह यक्ष की एक पत्नी थी, जिसका नाम निर्माष्टि था। इसका जन्म कलि की पत्नी के गर्भ से तब हुआ था, जब उसने अपने मासिक-धर्म के समय किसी चाण्डाल को देखा था। इन दोनों से सोलह सन्तानों का जन्म हुआ था जो समस्त विश्व में व्याप्त थे। इनमें आठ पुत्र थे और आठ पुत्रियाँ थीं और ये सब बड़े भीषण और बीभत्स थे। उनकी इन सन्तानों में जो आठ पुत्र थे, उनके नाम सुनो—१ला) दन्ताकृष्टि, २रा) उक्ति, ३रा) परिवर्त, ४था) अङ्गध्रुक्, ५वां) शकुनि, ६ठा) गण्डप्रान्तरति, ७वां) गर्भहा और ८वां) सस्यहा। इनकी आठ जो पुत्रियाँ थीं, उनके नाम भी सुन लो—१ली) नियोजिका, २री) विरोधिनी, ३री) स्वयंहारकरी, ४थी) भ्रामणी, ५वीं) ऋतुहारिका, ६ठी) स्मृतिहरा (स्मृतिहरी, स्मृतिहारिका) और ७वीं) बीजहरा (बीजहरी, बीजहारिका) बड़ी दारुण अथवा क्रूरहृदय थीं और ८वीं) अर्थात् विद्वेषणी तो लोक के लिए बड़ी भयावह थी। इन कन्याओं के जो कर्म हैं, उनके संबन्ध में मैं बताऊंगा और उनके द्वारा उत्पादित दोषों के प्रशमन के उपाय भी बताऊंगा।

एतासां कर्म वक्ष्यामि दोषप्रशमनञ्च यत् ।
अष्टानाञ्च कुमाराणां श्रूयतां द्विजसत्तम ।।७।
दन्ताकृष्टिः प्रसुप्तानां बालानां दशनस्थितः ।
करोति दन्तसंघर्षं चिकीर्षुर्दुःसहागमम् ।।८।
तस्योपशमनं कार्य्यं सुप्तस्य सितसर्षपैः ।
शयनस्योपरि क्षिप्तैर्मानुषैर्दशनोपरि ।।९।
सुवर्च्चलौषधीस्नानात्तथा सच्छास्त्रकीर्त्तनात् ।
उष्ट्रकण्टकखड्गास्थि-क्षौमवस्त्रविधारणात् ।।१०।
तिष्ठत्यन्यकुमारस्तु तथास्त्वित्यसकृद् ब्रुवन् ।
शुभाशुभे नृणां युङ्क्ते तथोक्तिस्तच्च नान्यथा ।।११।
तस्माददुष्टं मङ्गल्यं वक्तव्यं पण्डितैः सदा ।
दुष्टे श्रुते तथैवोक्ते कीर्त्तनीयो जनार्दनः ।।१२।
चराचरगुरुर्ब्रह्मा या यस्य कुलदेवता ।
अन्यगर्भे परान् गर्भान् सदैव परिवर्त्तयन् ।।१३।

पहले दुःसह और निर्माष्टि के आठ पुत्रों के कर्म और उनके द्वारा उत्पादित दोषों की शान्ति के उपाय बता रहा हूँ। सुनो ।। १-७ ।।

पहला पुत्र 'दन्ताकृष्टि' सोये हुए बच्चों के दाँत में अवस्थित रहता था और दाँतों से सङ्घर्ष करता था, जिसके कारण उनके दाँत बड़े कष्ट से निकल पाते थे। बच्चों के इस रोग-दोष के उपशमन के लिए, उनके पिता को यह करना चाहिये कि जब बच्चे पालने पर सोये हों, तब सफेद सरसों के दाने उनके दाँतों पर छींट दें ।। ८-९ ।।

इसके अतिरिक्त, सुवर्चला नाम की औषधि मिलाए पानी से स्नान कराने, सच्छास्त्रों के पाठ-पारायण करने तथा हाथ में ऊंट, साही और गैंडे की हड्डी बाँधने एवं क्षौमवस्त्र धारण कराने से भी इस दोष की शान्ति की जा सकती। दूसरा 'उक्ति' नाम का पुत्र बार-बार 'तथास्तु' (हाँ, बहुत ठीक) बोलता रहता है और मनुष्यों को पुण्य-पाप के कर्मों में लगाये रहता है और उसकी बात निष्फल नहीं होती। इस दोष के उपशमन के लिए बुद्धिमान् लोगों को सदा निर्दुष्ट और माङ्गलिक वचन बोलना चाहिए। यदि मुँह से दुर्वचन निकल जाय या किसी का दुर्वचन कानों में पड़ जाय तो भगवान् विष्णु अथवा चराचर गुरु ब्रह्मा या अपने कुलदेवता के नाम का जप-कीर्तन करना चाहिये ।। १०-१२ ।।

तीसरे 'परिवर्त' नाम के पुत्र का काम किसी नारी के गर्भस्थ शिशु को दूसरी नारी के गर्भस्थ शिशु के रूप में परिवर्तित कर देना और कुछ कहने के. इच्छुक किसी

रतिमाप्नोति वाक्यञ्च विवक्षोरन्यदेव यत् ।
परिवर्त्तकसंज्ञोऽयं तस्यापि सितसर्षपैः ॥१४॥
रक्षोघ्नमन्त्रजप्यैश्च रक्षां कुर्वीत तत्त्ववित् ।
अन्यश्चानिलवन्नृणामङ्गेषु स्फुरणोदितम् ॥१५॥
शुभाशुभं समाचष्टे कुशैस्तस्याङ्गताडनम् ।
काकादिपक्षिसंस्थोऽन्यः श्वादेरङ्गगतोऽपि वा ॥१६॥
शुभाशुभञ्च शकुनिः कुमारोऽन्यो ब्रवीति वै ।
तत्रापि दुष्टे व्याक्षेपः प्रारम्भत्याग एव च ॥१७॥
शुभे द्रुततरं कार्य्यमिति प्राह प्रजापतिः ।
गण्डान्तेषु स्थितश्चान्यो मुहूर्त्तार्द्धं द्विजोत्तम ॥१८॥
सर्वारम्भान् कुमारोऽत्ति शस्तताञ्चानसूयताम् ।
विप्रोक्त्या देवतास्तुत्या मूलोत्खातेन च द्विज ॥१९॥
गोमूत्रसर्षपस्नानैस्तदृक्षग्रहपूजनैः ।
पुनश्च धर्मोपनिषत्करणैः शास्त्रदर्शनैः ॥२०॥

की अच्छी बात को बुरी बात के रूप में बदल देना है। इन दोनों कामों में उसे बड़ा आनन्द मिलता है। इससे रक्षाविधान के लिए बुद्धिमान् लोगों को सफेद सरसों के दानों को बिखेरना तथा रक्षोघ्न मन्त्रों का जप करना आवश्यक है। चौथा 'अङ्गध्रुक्' नामक पुत्र लोगों के अङ्गों में वायु के प्रकोप के समान फड़कन पैदा करके उन्हें अनेक भावी शुभाशुभ की सूचना दे देता है। इससे रक्षा का उपाय कुश से अङ्गताडन है। पाँचवा 'शकुनि' नाम का पुत्र कौऐ प्रभृति कर्कश बोली वाले पक्षिओं अथवा रोने वाले कुत्तों के शरीर में रहता है और मनुष्यों को उनके भावी शुभाशुभ की सूचना दिया करता है। इससे रक्षा का उपाय अशुभ के घटित होने पर अभीष्ट कार्य में विलम्ब कर देना या प्रारम्भ किए कार्य का परित्याग कर देना है और शुभ घटना होने पर यथाशीघ्र कार्य सम्पन्न कर लेना है, जैसा कि ब्रह्मा प्रजापति का ही कहना है ॥ १३-१७ ॥

द्विजवर क्रौष्टुकि ! 'गण्डप्रान्तरति' नाम का छठा दुःसह-पुत्र ऐसा है, जो आधे मुहूर्त भर भी यदि किसी के गाल पर बैठ जाय तो वह उस मनुष्य के सभी कर्मानुष्ठान मानो खा लेता है (नष्ट कर देता है) और लोक में उसकी प्रशंसा तथा उनके परनिन्दा-वर्जन के स्वभाव को भी समाप्त कर देता है। इसके द्वारा उत्पादित दोष, द्विजवर ! इन उपायों से शान्त किए जा सकते हैं—ब्राह्मण के आशीर्वचन से, देवों के स्तवन से, कन्दमूल के उखाड़ने से, गोमूत्र में पिसे सरसों के तेल लगा कर स्नान करने से, ग्रह-नक्षत्रों के पूजन से, धर्म के तथा उपनिषदों के उपदेशानुसार आचरण करने से, शास्त्रों

अवज्ञया जन्मनश्च प्रशमं याति गण्डवान् ।
गर्भे स्त्रीणां तथाऽन्यस्तु फलनाशी सुदारुणः ॥२१॥
तस्य रक्षा सदा कार्य्या नित्यं शौचनिषेवणात् ।
प्रसिद्धमन्त्रलिखनाच्छस्तमाल्यादिधारणात् ॥२२॥
विशुद्धगेहावसथादनायासाच्च वै द्विज ।
तथैव सस्यहा चान्यः सस्यर्द्धिमुपहन्ति यः ॥२३॥
तस्यापि रक्षां कुर्वीत जीर्णोपानद्विधारणात् ।
तथापसव्यगमनाच्चाण्डालस्य प्रवेशनात् ॥२४॥
बहिर्बलिप्रदानाच्च सोमाम्बुपरिकीर्त्तनात् ।
परदारपरद्रव्यहरणादिषु मानवान् ॥२५॥
नियोजयति चैवान्यान् कन्या सा च नियोजिका ।
तस्याः पवित्रपठनात् क्रोधलोभादिवर्जनात् ॥२६॥
नियोजयति मामिष्टविरोधाच्च विवर्जनम् ।
आक्रुष्टोऽन्येन मन्येत ताडितो वा नियोजिका ॥२७॥
नियोजयत्येनमिति न गच्छेत्तद्वशं बुधः ।
परदारादिसंसर्गे चित्तमात्मानमेव च ॥२८॥

के अध्ययन-मनन से और संसार में जन्म-ग्रहण के प्रति तिरस्कार की भावना करने से। सातवाँ 'गर्भहा' (गर्भघाती) नाम का जो दुःसह का पुत्र है, वह स्त्रियों के गर्भ में प्रविष्ट होकर भ्रूण का नाश कर देता है और बड़ा क्रूर है। उससे बचने के लिए सदा मन-वचन-कर्म में शुद्धता का आधान, प्रसिद्ध मन्त्रों का लेखन, प्रशस्त माल्यादि माङ्गलिक पदार्थों का उपभोग, पवित्र गृह में आवास तथा व्यग्रता का परित्याग—ये उपाय आवश्यक हैं। आठवाँ दुःसह-पुत्र 'सस्यहा' (सस्यघाती) है, जो कि शस्यसमृद्धि का शत्रु है। इससे रक्षा करने के लिए फटे-चिटे जूते पहनने, बायीं ओर से रास्ते पर चलने-फिरने, खेत में चाण्डाल को प्रविष्ट कराने, घर के बाहर बलि प्रदान करने तथा सोम-रस के गुण-कीर्तन करने के उपायों को अपनाना चाहिए। इसी प्रकार दुःसह की पहली 'नियोजिका' नाम की कन्या वह है, जो मनुष्यों को परनारी तथा परद्रव्य के अपहरण प्रभृति दुष्कर्मों में प्रवृत्त कराती है। इससे अपने बचाव के लिए पवित्र वेद-मन्त्रों तथा देव-स्तोत्रों का पाठ करना, क्रोधलोभादि का परित्याग करना और 'यही दुष्टा मेरे अभीष्ट के विरोध में मुझे दुष्कर्मों में प्रवृत्त कर रही है' इस भाव से भावित होना—ये बातें आवश्यक हैं। यदि कोई आक्रोश में आकर उल्टी-सीधी बातें कहे या मार-पीट करे, तो यही सोचना चाहिए कि इसी नियोजिका ने उस व्यक्ति को ऐसा करने के लिए प्रेरित किया होगा और इसलिए उसके वश में आकर स्वयं न तो आक्रोश की बात

नियोजयत्यत्र सा मामिति प्राज्ञो विचिन्तयेत् ।
विरोधं कुरुते चान्या दम्पत्योः प्रीयमाणयोः ॥२९॥

बन्धूनां सुहृदां पित्रोः पुत्रैः सावर्णिकैश्च या ।
विरोधिनी सा तद्रक्षां कुर्वीत बलिकर्मणा ॥३०॥

तथातिवादसहनाच्छास्त्राचारनिषेवणात् ।
धान्यं खलाद् गृहाद् गोभ्यः पयः सर्पिस्तथापरा ॥३१॥

समृद्धिमृद्धिमद्द्रव्यादपहन्ति च कन्यका ।
सा स्वयंहारिकेत्युक्ता सदान्तर्धानतत्परा ॥३२॥

महानसादर्द्धसिद्धमन्नागारस्थितं तथा ।
परिविश्यमाणञ्च सदा सार्द्धं भुङ्क्ते च भुञ्जता ॥३३॥

उच्छेषणं मनुष्याणां हरत्यन्नञ्च दुर्हरा ।
कर्मान्तागारशालाभ्यः सिद्धर्द्धिं हरति द्विज ॥३४॥

करनी चाहिये और न आक्रोश में आकर मार-पीट करनी चाहिये । बुद्धिमान् मनुष्य को यह सोचना चाहिए कि लोक-जीवन में परस्त्री-प्रसङ्ग, परद्रव्यापहरण प्रभृति जो दुष्कर्म हैं उनके प्रति यदि उसके मन में प्रवृत्ति उत्पन्न हो रही है, तो वह इसी नियोजिका के द्वारा करायी जा रही है । 'विरोधिनी' नामकी दूसरी कन्या वह है, जो कि परस्पर प्रेमपूर्वक रहने वाले पति-पत्नी में, वन्धु-बान्धवों में, मित्रों में, माता-पिता और पुत्र में तथा एक वर्ण के ही व्यक्तियों में विरोध वैमनस्य के भाव पैदा किया करती है । इससे रक्षा का विधान बलिकर्म का अनुष्ठान है ॥ १८-३० ॥

किसी के डाँट-डपट के सहने के सामर्थ्य का हृदय में आधान और शास्त्रविहित आचार का अनुसरण भी इससे (विरोधिनी से) बचाव के उपाय हैं । 'स्वयंहारकरी' नाम वाली तीसरी जो दुःसह पुत्री कही जाती है, उसका काम खलिहानों और घरों से अन्न का अपहरण है, गौओं से उनके दूध और घी का अपहरण है और समृद्धि के साधनभूत पदार्थों से उनकी समृद्धि-शक्ति का अपहरण है । यह अपना काम करके सदा अविलम्ब अन्तर्हित हो जाया करती है ॥ ३१-३२ ॥

इस 'स्वयंहारिका' के और भी अनेकों दुष्कर्म हैं, जैसे कि रसोईघर से आधे पके अन्न का अपहरण और अन्नागार में रखे अन्न का अपहरण । यह परोसे गये भक्ष्य-भोज्य को, उसके भोजन करने वाले मनुष्य के साथ खाया करती है । यह ऐसी दुष्ट चोर है कि मनुष्यों द्वारा भोजन किये जाने के वाद वचे-खुचे भोजन चुरा लेती है और इसके अतिरिक्त रसोईघर में पके-पकाये रखे अन्न भी उठा ले जाती है । द्विजवर क्रौष्टुकि ! यह खनिज द्रव्यों की शोधनशालाओं और गृहस्थों के आवास-कक्षों से, उनमें संगृहीत

गोस्त्रीस्तनेभ्यश्च पयः क्षीरहारी सदैव सा ।
दध्नो घृतं तिलात्तैलं सुरागारात्तथा सुराम् ॥३५॥
रागं कुसुम्भकादीनां कार्पासात् सूत्रमेव च ।
सा स्वयंहारिका नाम हरत्यविरतं द्विज ॥३६॥
कुर्य्याच्छिखण्डिनोर्द्वन्द्वं रक्षार्थं कृत्रिमां स्त्रियम् ।
रक्षाश्चैव गृहे लेख्या वर्ज्याचो च्छिष्टता तथा ॥३७॥
होमाग्निदेवताधूपभस्मना च परिष्क्रिया ।
कार्य्या क्षीरादिभाण्डानामेवं तद्रक्षणं स्मृतम् ॥३८॥
उद्वेगं जनयत्यन्या एकस्थाननिवासिनः ।
पुरुषस्य तु या प्रोक्ता भ्रामणी सा तु कन्यका ॥३९॥
तस्याथ रक्षां कुर्वीत विक्षिप्तैः सितसर्षपैः ।
आसने शयने चोर्व्यां यत्रास्ते स तु मानवः ॥४०॥
चिन्तयेच्च नरः पापा मामेषा दुष्टचेतना ।
भ्रामयत्यसकृज्जप्यं भुवः सूक्तं समाधिना ॥४१॥
स्त्रीणां पुष्पं हरत्यन्या प्रवृत्तं सा तु कन्यका ।
तथाऽप्रवृत्तं सा ज्ञेया दौःसहा ऋतुहारिका ॥४२॥

धन-समृद्धि का अपहरण कर लेती है। यह गायों और स्त्रियों के स्तनों से दूध भी चुरा ले जाती है। दही से घी की चोरी, तिल से तेल की चोरी, मदिरालय से मदिरा की चोरी, सुन्दर सुगन्धित केसर आदि के फूलों से उनके रङ्ग की चोरी और कपास के पौधों से सूत की चोरी—यही स्वयंहारिका—'जैसा नाम वैसा काम' की लोकोक्ति के अनुसार निरन्तर किया करती है। इससे रक्षा के लिए मोरों के जोड़ों और काल्पनिक स्त्रियों के चित्र तथा घर में मांगलिक अल्पना की रचना करनी चाहिए तथा सदा उच्छिष्टता अथवा जूठन का वर्जन करना चाहिए। इससे, दूध-दही आदि के बर्तनों को बचाने के लिए, उन्हें होम की अग्नि और देवता के लिए जलाए धूप की राख से माँजना-धोना चाहिए। चौथी दुःसह-पुत्री, जिसे 'भ्रामणी' कहते हैं, एक स्थान पर रहने वाले मनुष्य के मन में उद्वेग उत्पन्न किया करती है,(जिसके कारण वह व्यर्थ इधर-उधर घूमना-फिरना चाहता है)। उसे बचाव का उपाय यह है कि जहाँ वह उद्विग्न मनुष्य रहता हो, वहां उसके आसन पर, उसकी शय्या पर और नीचे जमीन पर सफेद रङ्ग के सरसों के दाने छींटे जांय। साथ ही साथ (भ्रामणी द्वारा) और उद्भ्रान्त बताए गए मनुष्य को. यह सोचकर कि यही पाप करने वाली दुष्टा (भ्रामणी) उसे उद्विग्न कर रही है, बड़े एकाग्रमन से पृथिवी-सूक्त का बार-बार जप करना चाहिये। पांचवी दुःसह-पुत्री 'ऋतुहारिका' कही जाती है। उसका काम स्त्रियों के प्रारब्ध मासिकधर्म का अपहरण

कुर्वीत तीर्थदेवौकश्चैत्यपर्वतसानुषु ।
नदीसङ्गमखातेषु स्नपनं तत्प्रशान्तये ।।४३।
मन्त्रवित् कृततत्त्वज्ञः पर्वसूषसि च द्विज ।
चिकित्साज्ञश्च वै वैद्यः संप्रयुक्तैर्वरौषधैः ।।४४।
स्मृतिञ्चापहरत्यन्या स्त्रीणां सा स्मृतिहारिका ।
विविक्तदेशसेवित्वात्तस्याश्चोपशमो भवेत् ।।४५।
बीजापहारिणी चान्या स्त्रीपुंसोरतिभीषणा ।
मेध्यान्नभोजनैः स्नानैस्तस्याश्चोपशमो भवेत ।।४६।
अष्टमी द्वेषणी नाम कन्या लोकभयावहा ।
या करोति जनद्विष्टं नरं नारीमथापि वा ।।४७।
मधुक्षीरघृताक्तांस्तु शान्त्यर्थं होमयेत्तिलान् ।
कुर्वीत मित्रविन्दाञ्च तथेष्टिन्तत् प्रशान्तये ।।४८।
एतेषान्तु कुमाराणां कन्यानां द्विजसत्तम ।
अष्टात्रिंशदपत्यानि तेषां नामानि मे शृणु ।।४९।

अथवा उनके मासिकधर्म का अवरोधन है। इस उपद्रव के उपशमन के लिए स्त्रियों को पवित्र तीर्थस्थलों, देवालयों, चैत्यों और पर्वत-शिखरों के जलाशयों, नदियों के सङ्गमों तथा पवित्र वापी-तटाकों में स्नान करवाना चाहिये ।। ३३-४३ ।।

इसके अतिरिक्त, मन्त्र-तन्त्र के जानने वाले और उनके प्रयोग में कुशल लोगों के द्वारा 'ऋतुहारिका' से त्रस्त नारियों की रक्षा के लिए, उन्हें (नारियों के) प्रत्येक मास के चार पर्वों में, सूर्योदय के पहले, स्नान करने के लिए बाध्य करवाना चाहिए और मासिकधर्म के लोप अथवा अवरोध की चिकित्सा के जानकार वैद्यों के द्वारा भी बताई औषधियों से मिले जल से स्नान करवाना चाहिए। दुःसह की छठी पुत्री 'स्मृतहारिका' कही जाती है, क्योंकि वह स्त्रियों की स्मरण-शक्ति चुरा लेती है। स्त्रियों के इस उपद्रव की शान्ति एकान्तस्थान के सेवन से सम्भव है ।। ४४-४५ ।।

सातवीं दुःसह-पुत्री बीजापहारिणी (बीजहरी, बीजापहारिका) है, जिसका काम नर-नारियों के बीज (रज और वीर्य) का अपहरण करना है और इस कारण यह बड़ी भयङ्कर है। इसका उपशमन पवित्र अन्न के भोजन तथा पवित्र जल से स्नान के द्वारा किया जाता है ।। ४६ ।।

आठवीं दुःसह-पुत्री, जिसका नाम 'द्वेषणी' है, लोकजीवन के लिए भयावह है, क्योंकि यह स्त्री और पुरुष—दोनों को, लोगों के विद्वेष का पात्र बना देती है। इसकी प्रशान्ति के लिए मधु-क्षीर तथा घृत में मिलाए तिलों के द्वारा होम करना चाहिए। इसकी शान्ति के लिए मित्रविन्दा नाम की इष्टि भी करनी चाहिए ।। ४७-४८ ।।

द्विजोत्तम क्रौष्टुकि ! दुःसह के ये जो पुत्र और पुत्रियाँ हैं, उनकी सन्तान-संख्या अड़तीस है। उनके नाम मैं सुना रहा हूँ ।। ४९ ।।

दन्ताकृष्टेरभूत् कन्या विजल्पा कलहा तथा ।
अवज्ञानृतदुष्टोक्तिर्विजल्पा तत्प्रशान्तये ॥५०॥

तामेव चिन्तयेत् प्राज्ञः प्रयतश्च गृही भवेत् ।
कलहा कलहं गेहे करोत्यविरतं नृणाम् ॥५१॥

कुटुम्बनाशहेतुः सा तत्प्रशान्ति निशामय ।
दूर्वाङ्कुरान्मधुघृतक्षीराक्तान् बलिकर्मणि ॥५२॥
विक्षिपेज्जुहुयाच्चैवानलं मित्रञ्च कीर्तयेत् ।
भूतानां मातृभिः सार्द्धं बालकानान्तु शान्तये ॥५३॥
विद्यानां तपसाञ्चैव संयमस्य यमस्य च ।
कृष्यां वाणिज्यलाभे च शान्ति कुर्वन्तु मे सदा ॥५४॥
पूजिताश्च यथान्यायं तुष्टि गच्छन्तु सर्वशः ।
कुष्माण्डा यातुधानाश्च ये चान्ये गणसंज्ञिताः ॥५५॥
महादेवप्रसादेन महेश्वरमतेन च ।
सर्व एते नृणां नित्यं तुष्टिमाशु व्रजन्तु ते ॥५६॥

'दन्ताकृष्टि' की दो कन्याएँ हैं, जिनके नाम 'विजल्पा' और 'कलहा' हैं। 'विजल्पा' का काम मनुष्यों में परस्पर अवज्ञा का भाव उत्पन्न करना है और उन्हें असत्य बोलने तथा मुँह से दुर्वचन निकालने के लिए प्रेरित करना है। इस दोष के प्रशमन के लिए बुद्धिमान् गृहस्थ मनुष्य को विजल्पा के विषय में सोचना-समझना चाहिए और संयतेन्द्रिय हो रहना चाहिए। 'कलहा' मनुष्यों के घरों में निरन्तर कलह उत्पन्न किया करती हैं और इस प्रकार परिवार के विनाश का कारण बन जाती है। इसकी शान्ति के उपाय बता रहा हूँ, जिसे ध्यान देकर सुनो—शहद, घी और दूध में भिगोए नए-नए दूर्वादलों को बलि में डाल देना चाहिए तथा उन्हीं से होम करना चाहिये। कलह द्वारा उत्पादित, समस्त प्राणियों तथा माताओं के साथ बच्चों के उपद्रवों की शान्ति के लिए, गृहस्थों को अग्नि और मित्र—इन दोनों देवों का नाम-कीर्तन तथा गुणकीर्तन करना चाहिए और उनसे प्रार्थना करना चाहिए कि वे उनके विद्योपार्जन, उनके तपश्चरण, उनके संयमपालन, उनके यमानुष्ठान, उनके कृषिकर्म और उनके वाणिज्यलाभ में कहलोत्पादित विघ्नों से उनकी रक्षा करें। साथ ही साथ, गृहस्थों को कुष्माण्डों, यातुधानों तथा अन्य शिवगणों की विधिवत् पूजा करनी चाहिए और उनसे प्रार्थना करनी चाहिए कि वे सब उन पर प्रसन्न रहें और शङ्कर भगवान् की कृपा से तथा उनकी अनुमति से यथाशीघ्र प्रसन्न होकर वे सब लोगों का कल्याण करें। गृहस्थों को उनसे यह भी प्रार्थना के रूप में निवेदन करना चाहिए कि वे उन पर

तुष्टाः सर्वं निरस्यन्तु दुष्कृतं दुरनुष्ठितम् ।
महापातकजं सर्वं यच्चान्यद्विघ्नकारणम् ॥५७॥
तेषामेव प्रसादेन विघ्ना नश्यन्तु सर्वशः ।
उद्वाहेषु च सर्वेषु वृद्धिकर्मसु चैव हि ॥५८॥
पुण्यानुष्ठानयोगेषु गुरुदेवार्चनेषु च ।
जपयज्ञविधानेषु यात्रासु च चतुर्दश ॥५९॥
शरीरारोग्यभोग्येषु सुखदानधनेषु च ।
वृद्धबालातुरेष्वेव शान्तिं कुर्वन्तु मे सदा ॥६०॥
सोमाम्बुपौ तथाम्भोधिः सविता चानिलानलौ ।
तथोक्तेः कालजिह्वोऽभूत् पुत्रस्तालनिकेतनः ॥६१॥
स येषां रसनासंस्थस्तानसाधून् विबाधते ।
परिवर्तसुतौ द्वौ तु विरूपविकृतौ द्विज ॥६२॥
तौ तु वृक्षाग्रपरिखाप्राकाराम्भोधिसंश्रयौ ।
गुर्विण्याः परिवर्तन्तौ कुरुतः पादपाणिषु ॥६३॥
क्रौष्टुके परिवर्तस्स्यात् गर्भस्यान्योदरात्ततः ।
न वृक्षं चैव नैवाद्रिं न प्राकारं महोदधिम् ॥६४॥

